शृध् (शृधु—Set) 1 A (but P also in the 2nd Future, Aorist and Conditional) शब्दकुत्सायां । to break wind, शर्धिताहे, शर्धिष्यते or शर्त्स्यति, अशर्धिष्यत, अशर्त्स्यत्, अशृधत्, अशर्धिष्ट, Caus. Aor अशशर्धत्—त, or अशीशृधत्–त Desid शिशर्धिषते, शिशृत्सति, Deri. शृद्ध, शृध्द्वा or शर्धित्वा.

शृध् (शृधु—Set) 1 U. उन्दने । to moisten, to wet, to cut off.

शेल् (शेलृ–Set) 1 P गतौ । to go, to move, Caus, Aor. अशिशेलत्-त.

शेव् (शेवृ—Set) 1 A. सेवने । to worship, to serve, Caus. Aor. अशिशेवत्–त.

शै (Anit) 1 P. पाके । to cook, शायति, शशौ, शशिथ, शशाथ, शातास्मि, शास्यति, अशासीत्, शायासं.

शोण् (शोणृ–Set) 1 P. वर्णगत्योः । to be red, to go, Caus Aor. अशुशोणत्—त.

शौट् (शौटृ-Set) 1 P. गर्वे । to be proud, Caus Aor अशुशौटत्-त.

श्चुत् or श्च्युत् (श्चुतिर् / श्च्युतिर्) (Set) 1 P. क्षरणे । to ooze, to diffuse Aor अश्चुतत् or अश्चोतीत्, Desid. चुश्चुतिषति, or चुश्चोतिषति श्चुतित or श्चोतित, श्चुतित्वा, or श्चोतित्वा.

श्मील् (Set) 1 P. निमेषणे । to wink.

श्यै (श्यैङ्–Anit) 1 A. गतौ । to go, to move, to wither. to dry up, Deri. श्यान, also शीन or शीत (cold).

श्रंक (श्रकि—Set) 1 A. / श्रंग् (श्रगि—Set) 1 P } गतौ । to go, to move.

श्रण् (घटादि —Set) 1 P. दाने । to give, Aor. अश्रणीत् , अश्राणीत् , Caus श्रणयति—ते, Pass. Aor. अश्राणि.

श्रथ् (घटादिः—Set) 1 P हिंसायाम् । to kill

श्रंथ् (श्रथि—Set) 1 A. शैथिल्ये । to loosen.

श्रंभ् (श्रंभु—Set) 1 A प्रमादे । to be careless, to err.

श्रि (श्रि–ञ्–Set) 1 U. सेवायां । to serve, to depend upon श्रयति—ते, शिश्राय—शिश्रिये, श्रयितास्मि—हे, श्रीयासं—श्रयिषीय, Pass. श्रीयते, Caus श्राययति—ते, अशिश्रयत्—त, Desid. शिश्रीषति—ते or शिश्रायिषति—ते.

श्रिष् (श्रिषु—Set) 1 P. दाहे । to burn, Deri श्रिष्ट, श्रिषित्वा, श्रेषित्वा or श्रिष्ट्वा.

श्रु (Anit) 1 P. गतौ । to go, to move.

श्रै (Anit) 1 P. श्रपणे । to cook, Bene श्रायासं or श्रेयासं.

श्रोण् (श्रोणृ–Set) 1 P. संघाते । to heap together, to collect.

श्लंक् { श्लकि—Set 1 A. } गतौ । to go, to move.
श्लंग् { श्लगि—Set 1 P. }

श्लथ् (घटादिः—Set) 1 P. हिंसायाम् । to hurt, Aor अश्लथीत्, अश्लाथीत् Caus. श्लथयति—ते Pass. Aor अश्लथि, अश्लाथि.

श्लाख् (श्लाखृ—Set) 1 P. व्याप्तौ । to pervade, to penetrate, Caus. Aor. अशश्लाखत्—त.

श्लाघ् (श्लाघृ—Set) 1 A. कत्थने । to praise, to flatter, to boast. Caus. Aor. अशश्लाघत्-त.

श्लिष् (श्लिषु–Set) 1 P. दाहे । to burn, Deri. श्लिष्ट, श्लिषित्वा, श्लेषित्वा or श्लिष्ट्वा.

श्लोक् (श्लोकृ–Set) 1 A. संघाते । to heap together, to collect, to versify; Caus Aor. अशुश्लोकत्–त.

श्लोण् (श्लोणृ–Set) 1 P. संघाते । to collect, Caus. Aor. अशुश्लोणत्-त,

श्वंक् { श्वकि } (Set) 1 A गतौ । to go.
श्वच् { —— }
श्वंच् { श्वचि }

श्वल्, श्वल्ल् (Set) 1 P आशुगमने । to run.

श्वि (टु–ओ—श्वि Set) 1 P. गतिवृद्ध्योः । to move, to increase, to grow, to swell, श्वयति, शिश्वाय, शुशाव, शिश्वयिथ, शुशविथ

श्वयितास्मि, अश्वयीत्, अशिश्वियत्, अश्वत्, शूयासं, Pass. शूयते, श्वयिष्यते or श्वायिष्यते, अश्वायि, Caus. श्वाययति—ते, Aor. अशिश्वयत्-त, or अशूशवत्—त, Desid. शिश्वायिषति, Desid. of the Caus शिश्वाययिषति—ते, or शुशावयिषति-ते, Deri. शून, श्वय, श्वयितुं, श्वयित्वा, उच्छ्रूय.

श्वित् (श्विता-Set) 1 A. वर्णे । to be white, Aor. अश्वितत्, अश्वेतिष्ट, Deri. श्वेदित, श्वित्त.

श्विंद् (श्विदि-Set) 1 A श्वैत्ये । to be white.

*ष्ठिव् (ष्ठिवु—Set) 1 P. निरसने । to spit, to sputter ष्ठीवति, तिष्ठेव or टिष्ठेव, Cau. Aor आटिष्ठिवत् or अतिष्ठिवत्, Desid तिष्ठेविषति, तुष्ठ्यूषति, टुष्ठ्यूषति, Deri. ष्ठ्यूत, ष्ठेवित्वा, ष्ठ्यूत्वा.

ष्वष्क् (ष्वष्क—Set) 1 A. गतौ । to go.

सग् (षगे-घटादिः—Set) 1 P. संवरणे । to cover, Caus. सगयति-ते.

सच् (षच-Set) 1 A. सेचने सेवनेच । to sprinkle, to serve.

सँच् (षर्च—Set) 1 U. समवाये । to be associated with, Aor असचीत्, असाचीत्.

संज् (षंज्—Anit) 1 P संगे । to cling to, to fasten, to embrace, Act. सजति, असजत्. सजतु, सजेयं, ससंज, ससाजिथ, ससंक्थ, संक्तास्मि, संक्ष्यति, असंक्ष्यत्, असांक्षीत्, सज्यासं, Pass सज्यते, संक्ष्यते, असंजि, Desid. सिसंक्षति, (अभिषिषंक्षति). Deri. सक्त, संज, संक्तुं, सक्त्वा, सजत्, सेजिवस्.

सट् (षट्-Set) 1 P. अवयवे । to be a part or portion, Aor असटीत्, असाटीत्.

सद् (षद्ऌ—Anit) 1 P. विशरणगत्यवसादनेषु । to divide, to break,

---

* A number of roots beginning with स् are written in the Dhâtupâtha with ष् to indicate that the स् is changed to ष् after certain prepositions. These roots will be found under स् in their proper order.

to go, to wither, to despond, to be weary, Act. सीदति, असीदत्, सीदतु, सीदेयं, (निषीदति), ससाद, सेदिथ, ससत्थ, सत्तास्मि, सत्स्यति, असत्स्यत्, असदत्, सद्यासं, Desid. सिषत्सति, निषिषत्सति, Deri. सन्न, साद्य, सत्तुं, सत्त्वा, निषद्य, सीदत्, सेदिवस्.

सन् (षणु-Set) 1 P. संभक्तौ । to divide, Aor. असनीत्, असानीत्, Bene. सन्यासं, सायासं, Pass सन्यते, सायते, असानि. Caus. सानयति—ते, असीषनत्—त, Desid. सिषनिषति or सिषासति.

सप् (षप्-Set) 1 P. समवाये । to connect, Aor. असपीत्, असापीत्.

सम् (षमु-Set) 1 P. वैकल्ये । to be composed

सेंव् (षव्-Set) 1 P संवधने । to go, to creep

सर्ब् (षर्ब्—Set) 1 P गतौ । to go, to move

सर्व् (षर्व्—Set) 1 P गतौ हिंसायांच । to go, to kill.

सल् (षल्-Set) 1 P. गतौ । to go, to move.

सस्ज् (षस्ज—Set) 1 U गतौ । to go, to become ready, Act सज्जति-ते, etc.

सह् (षहँ-Set) 1 A मर्षणे । to suffer, to forbear, to be patient, to wait, to be able to resist, to conquer, to stop, Act सेहिताहे or सोढाहे, Deri सोढ, परिसोढ, विसोढ, सहितव्य or सोढव्य, सहितु or सोढुं, सहित्वा or सोढ्वा, प्रसह्य, सहमान, सेहान

सिट् (षिट्-Set) 1 P. अनादरे । to disregard

सिध् (षिधु-Set) 1 P गतौ । to go, (The initial स् is not changed to ष् after prepositions in this case) Desid. सिसिधिषति or सिसेधिषति, Deri. सिद्ध, सिधित्वा, सेधित्वा, सिद्ध्वा.

सिध् (षिधू—Wet) 1 P. शास्त्रे मांगल्येच । to ordain, to instruct, to do an auspicious act, to turn out auspiciously, to ward off, to restrain, to interdict, Act सिषेध, सिषेधिथ or सिषेद्ध, सेधितास्मि, or सेद्धास्मि सेधिष्यति or सेत्स्यति, असेधिष्यत् or असेत्स्यत, असैत्सीत् or असेधीत्, सिध्यासं, Desid. सिषित्सति or सिसेधिषति or सिसिधिषति, Deri सिद्ध, सेद्धव्य or सेधितव्य, सेधितुं or सेद्धुं, सिध्वा, or सेधित्वा or सिधित्वा

सिन्व् (षिवि—Set) 1 P सेचने । to sprinkle.

सिभ् (षिभु–Set) 1 P हिंसायां । to kill, Deri सिब्ध, सिभित्वा, सेभित्वा, सिब्ध्वा, सेभितुं.

सिम्भ् (षिम्भु–Set) 1 P. हिंसायां । to kill, Deri सिब्ध, सिंभित्वा, सिब्ध्वा-

सीक् (सीकृ Set) 1 A. सेचने । to sprinkle, Caus. Aor असिसीकत्–त.

सु (षु–Anit) 1 P प्रसवैश्वर्ययोः । to bring forth, to possess power or supremacy, to permit Act सवति, सुषाव, सुषविथ, सुषोथ, सोतास्मि, सोष्यति, असावीत्, असौषीत्, सूयासं, Pass सूयते असावि, Caus. सावयति—ते, असूषवत्—त, Desid सुसूषति, Deri. सुत, सुत्वा, प्रसुत्य, सोतुं

सुभ् (षुभ्) (Set) 1 P भाषाहिंसयोः । to speak, to kill
सुंभ् (षुंभ्)
सुंभ्

सूद् (षूद्—Set) 1 A क्षरणे । to distil, to strike, to hurt, to destroy, to leak, to deposit

सूर्क्ष् (षूर्क्ष्—Set) 1 P आदरे । to respeet

सूर्क्ष्य् (षूर्क्ष्य्—Set) 1 P ईर्ष्यायां । to envy, to despise.

सृ (Anit) 1 P गतौ । to go, to move, to approach, to slip, to blow, to flow, Act सरति, ससार, सर्तास्मि, सरिष्यति, असरिष्यत्, असार्षीत्, स्रियासं, Pass स्रियते, सरिष्यते or सारिष्यते, असारि, Caus. सारयति—ते, असीसरत्–त, Desid. सिसीर्षति, Deri सृत, सर्तव्य, सार्य, सर्तुं, सृत्वा, अपसृत्य, सरत्, सरिष्यत्, ससृवस्.

सृ (Anit) 1 P. आशुगमने । to run, Act. धावति, अधावत्, धावतु, धावेयं.

सृप् (सृप्लृ—Anit) 1 P. गतौ । to go, to creep, Act सर्पति, ससर्प, सर्प्तास्मि or स्रप्तास्मि, सर्प्स्यति or स्रप्स्यति असर्प्स्यत् or अस्रप्स्यत्, असृपत्, सृप्यासं, Pass सृप्यते, सर्प्स्यते, or स्रप्स्यते, असर्पि, Caus. सर्पयति—ते, अससर्पत्—त or असीसृपत्—त. Desid. सिसृप्सति, Deri. सृप्त, सर्पितव्य or स्रप्तव्य, सृप्य, सर्प्तुं. or स्रप्तुं.

सृभ् } सृभु } (Set) 1 P, हिंसायां । to kill, to slay, Deri. सृब्ध,
सृंभ् } सृंभु } सृभित्वा or सृब्ध्वा.

सेक् (सेकृ—Set) 1 A. गतौ । to go, to move, Caus. Aor असिसेकत्-त.

सेल् (षेलृ—Set) 1 P गतौ । to go, to move, Caus Aor असिषेलत्-त.

सेव् (षेवृ—Set) 1 A. सेवने । to serve, to honour, to follow, to use, to enjoy, to cultivate, to practise, to devote oneself to, to inhabit, to frequent, to guard, to protect, Caus. Aor. असिषेवत्-त.

सै (षै—Anit) 1 P क्षये । to waste away, to decline

स्कंद् (स्कंदिर्—Anit) 1 P गतिशोषणयो । to go, to be dry, Act स्कंत्तास्मि, स्कंत्स्यति, अस्कंत्स्यत्, अस्कदत्, or अस्कांत्सीत्, स्कद्यास्‌ Pass. स्कद्यते, Deri स्कन्न, विस्कन्न, परिस्कन्न, or, परिष्कण्ण, स्कंत्तुं, स्कंत्त्वा.

स्कंभ् (स्कभि-Set) 1 A प्रतिबंधने । to obstruct.

स्कुंद् (स्कुदि-Set) 1 A. आप्रवणे । to jump, to raise, to lift.

स्खद् (घटादि.-Set) 1 A विद्रावणे । to destroy, to cut, Caus. स्खदयति—ते

स्खल् (घटादि -Set) 1 P. संचलने । to stumble, to totter, to deviate, to blunder, to err, to stammer, to drop, Caus स्खलयति—ते

स्तक् (ष्टक्-घटादि.-Set) 1 P. प्रतिघाते । to resist, to repel, Aor. अस्तकीत्, अस्ताकीत्, Caus स्तकयति-ते.

स्तक्ष् (ष्टक्ष्-Set) 1 P. गतौ । to go, to move.

स्तग् (ष्टगे-घटादि.-Set) 1 P संवरणे । to cover, Caus स्तगयति-ते, अतिष्टगत्-त,

स्तन् (घटादि -Set) 1 P शब्दे । to sound, to thunder.

स्तम् (ष्टम्-Set) 1 P वैक्लव्ये अवैक्लव्येच । to be confused, not to be confused.

स्तंभ् (ष्टभि-Set) 1 A. प्रतिबंधने । to stop, to hinder, to become stiff or naughty, to paralyze, to fix firmly.

स्तिप् (ष्टिपृ-Set) 1 A. क्षरणे । to ooze, Caus. Aor. अतिष्टेपत्-त.

स्तुच् (ष्टुच-Set) 1 A. प्रसादे । to be pleased

स्तुभ (ष्टुभु—Set) 1 A. स्तंभे । to stop, Deri स्तुब्ध, स्तुभित्वा, स्तोभित्वा, स्तुब्ध्वा.

स्तृक्ष् (ष्टृक्ष्-Set) 1 P गतौ । to go, to move

स्तेप् (ष्टेपृ-Set) 1 A. क्षरणे । to ooze, Caus. Aor अतिष्टेपत्-त

स्तै (ष्टै-Anit) 1 P. वेष्टने । to cover, to adorn

स्त्यै (ष्ट्यै-Anit) 1 P शब्दसंघातयोः । to sound, to collect into a heap, to spread about, to crowd, Caus स्त्यापयति—ते. आतस्त्यपत्—त or अतिष्ट्यपत—त. Desid तिस्त्यासति, तिष्ट्यासति

स्थग् (ष्टग्—घटादि -Set) 1 P. संवरणे । to cover, to conceal, Caus स्थगयति—ते, अतिष्टगत्—त.

स्थल् (ष्टल्—Set) 1 P स्थाने to stand firm.

स्था (ष्ठा–Anit) 1 P (for A see page 18). गतिनिवृत्तौ । to stand, to stay, to be, तिष्ठति—ते, तस्थौ-स्थे, तस्थिथ or तस्थाथ-स्थिषे. स्थातास्मि-हे. अस्थात्-अस्थित. स्थेयासं—स्थासीय. Pass स्थीयते. स्थास्यते or स्थायिष्यते अस्थायि Caus स्थापयति—ते अतिष्ठिपत्-त. Desid तिष्ठासति-ते Deri स्थित-स्थेय. स्थातुं. स्थित्वा. तिष्ठाय, तिष्ठत्-मान. स्थास्यत्-मान तस्थिवस्-तस्थान

स्नै (ष्णै–Anit) 1 P. वेष्टनेशोभायांच । to cover, to wrap, to adorn.

स्पंद् (स्पदि–Set) 1 A. किंचिच्चलने । to throb, to quiver, Caus. स्पंदयति, अपस्पंदत.

स्पर्ध् (स्पर्ध—Set) 1 A. संघर्षे । to contend with, to vie with, to emulate, to challenge.

स्पश् (स्पश—Set) 1 U बाधन स्पर्शनयो । to obstruct, to touch, to perceive clearly, to undertake, to string together, Aor. अस्पशीत्, अस्पाशीत्.

स्फाय् (स्फायी—Set) 1 A वृद्धौ । to grow fat, to increase, to expand, Caus स्फावयति—ते, अपिस्फवत्—त. Deri. स्फीत.

स्फुट् (स्फुट—Set) 1 A. विकसने । to burst, to blossom, to blow, Desid पुस्फुटिषते, पुस्फोटिषते, Deri स्फुटित or स्फोटित.

स्फुट् (स्फुटिर्-Set) 1 P. विशरणे । to split open, Aor अस्फुटत् or अस्फोटीत्, Desid. पुस्फुटिषति or पुस्फोटिषति.

स्फुंट् { स्फुटि—Set 1 P } विकसने । to open, to expand.
स्फुंड् { स्फुडि—Set 1 A. }

स्फुर्च्छ् (स्फुर्च्छा—Set) 1 P विस्तृतौ । to spread, to extend, to forget, Act. स्फूर्च्छति, Deri. स्फूर्च्छित, स्फूर्ण.

स्फूर्ज् (टु-ओ—स्फूर्जा-Set) 1 P वज्रनिर्घोषे । to thunder, to explode, to glitter, to burst, Deri स्फूर्जित, स्फूर्ण. स्फूर्जथु. (a clap of thunder)

स्मि (ष्मि—ङ्—Anit) 1 A. ईषद्धसने । to smile, to expand, to bloom, Act. स्मयते, सिष्मिये, स्मेताहे, स्मेष्यते, अस्मेष्यत, अस्मेष्ट, स्मेषीय, Pass स्मीयते, स्मेष्यते or स्मायिष्यते, अस्मायि, अस्मेषि or अस्मायिषि, Caus. स्माययति or स्मापयते, असिष्मयत or असिष्मपत्, Desid सिस्मयिषते

स्मील् (Set) 1 P. निमेषणे । to wink

स्मृ (Anit) 1 P. चिंतायाम् । to remember, to recollect, to think upon, to recite mentally, to record in a " Smriti ", Act. स्मरति, सस्मार, सस्मर्थ, स्मर्तास्मि, स्मरिष्यति, अस्मरिष्यत्, अस्मार्षीत् स्मर्यासं, Pass. स्मर्यते, अस्मारि, स्मरिष्यते or स्मारिष्यते, Caus. स्मरयति-ते, Desid सुस्मूर्षते, Deri. स्मृत, स्मर्तुं स्मृत्वा

स्मृ (घटादि—Anit) 1 P आध्याने । to long for, to regret, Caus. स्मरयति—ते.

स्यंद् (स्यंदू-Wet) 1 A प्रस्रवणे । to ooze, to feel, Act. सस्यंदे, सस्यंदिषे or सस्यंत्से, स्यंदिताहे—स्यंत्ताहे, स्यंदिष्यते or स्यंत्स्यते—ति, अस्यंदत्, अस्यंदिष्ट, अस्यंत्त, स्यंदिषीय or स्यंत्सीय, Pass. स्यंद्यते,

स्यंदिष्यते, or स्यंत्स्यते, अस्यंदि, Desid सिस्यंदिषते or सिस्यंत्स्यते–ति, Deri स्यन्न, स्यंदितव्य or स्यंत्तव्य, स्यंदितुं or स्यंत्तुं, स्यंदित्वा, स्यंत्त्वा.

स्यम् (स्यमु—Set) 1 P शब्दे । to sound, to shout, Deri. स्यांत, स्यमित्वा, स्यांत्वा.

स्रंक् (स्रकि—Set) 1 A. गतौ । to go, to move.

स्रंभ् (स्रंभु—Set) 1 A प्रमादे विश्वासेच । to err, to entrust Aor. अस्रंभत्,*अस्रंभिष्ट, Deri. स्रब्ध, स्रंभित्वा, स्रब्ध्वा.

स्रंस् (स्रंसु-Set) 1 A. अवस्रंसने । to fall down, to drop, to slip off, to hang down. Aor अस्रंसत् or अस्रंसिष्ट.

स्रु (Anit) 1 P. गतौ । to go, to flow, Aor, अस्रोष्यत् or असुस्रुवत्

स्रेक् (स्रेकृ—Set) 1 A. गतौ । to go, to move, Caus Aor. असिस्रेकत्—त.

स्वंज् (ष्वंज—Anit) 1 A परिष्वंगे । to embrace, to clasp, to encircle, Act स्वजते, अस्वजत, स्वजतां, स्वजेय, सस्वजे, or सस्वंजे, स्वंक्ताहे, स्वंक्ष्यते, अस्वंक्ष्यत, अस्वंक्त, स्वंक्षीय, Pass स्वज्यते, स्वंक्ष्यते, अस्वंजि, Desid सिस्वंक्षते, Deri. स्वक्त, स्वंक्तुं, स्वंक्त्वा or स्वक्त्वा, परिष्वज्य.

स्वद् (ष्वद्–Set) 1 A. आस्वादने । to be pleasant to the taste, to be liked, to taste, to eat, to please, Caus. Aor. असिष्वदत्—त.

स्वन् (Set) 1 P. शब्दे । to sound, to sing, Aor. अस्वनीत् or अस्वानीत्, Caus. स्वानयति—ते, Deri स्वनित, आस्वांत or आस्वनित्. स्वांतं (the mind)

स्वन् (घटादि —Set) 1 P अवतंसने । to deck, to adorn, Caus. स्वनयति–ते.

स्वर्द् (स्वर्द–Set) 1 A. आस्वादने । to taste, to be pleasing.

स्वाद् (स्वादृ–Set) 1 A. आस्वादने । to taste, to be pleasing, Caus. Aor असिस्वादत्–त.

स्विद् (ञि—ष्विदा—Set) 1 A. स्नेहनमोचनयो । to be greasy, to perspire, to be disturbed, to quit, Aor अस्विदत् or अस्वेदिष्ट, Caus, Aor असिष्विदत्—त, Desid. सिस्वेदिषते or सिस्विदिषते, Deri स्विन्न or स्विदित or स्वेदित, स्वेदित्वा or स्विदित्वा.

स्वृ (Wet) 1 P (but A. after सं) शब्दोपतापयो । to sound, to praise, to pain, to go, Act स्वरितास्मि—हे or स्वर्तास्मि—हे, स्वरिष्यति–ते, अस्वरिष्यत्—त, अस्वारीत् or अस्वार्षीत्, स्वर्यास, स्वरिषीय or स्वृषीय, Pass स्वर्यते, स्वरिष्यते or स्वारिष्यते, अस्वारि, Desid सिस्वरिषति—ते or सुस्वूर्षति–ते, Deri. स्वृत, स्वरितव्य or स्वर्तव्य, स्वरितुं or स्वर्तुं

हट् (Set) 1 P. दीप्तौ । to shine, Aor अहटीत्, अहाटीत्

हठ् (Set) 1 P प्लुतिषठत्वयो । to leap, to be wicked, to treat with violence, Aor अहठीत्, अहाठीत्.

हद् (Anit) 1 A पुरीषोत्सर्गे । to void or discharge excrement, Act हदते, जहदे, हत्ताहे, हत्स्यते, अहत्त, हत्सीय, Caus. हादयति, अजीहदत् Desid जिहत्सते, Deri. हन्न, हत्त्वा, हत्तुं

हम्म्, हय् { Set } 1 P गतौ । to go, to move

हर्य् (Set) 1 P गतिकांत्यो । to go, to shine

हल् (Set) 1 P विलेखनेगतौच । to plough, to make furrows, to go

हस् (Set) 1 P. हसने । to laugh, to smile, to joke, to open, to resemble, to ridicule.

हिक्क (हिक्क–Set) 1 U. अव्यक्तेशब्दे । to make any indistinct sound.

हिट् (Set) 1 P आक्रोशे । to curse, to swear, to shout.

हिड् (हिडि—Set) 1 A. गत्यनादरयो । to go, to wander, to disregard.

हिन्व् (हिवि–Set) 1 P. प्रीणने । to please, to satisfy.

हिंस् (Set) 1 P हिंसायाम् । to kill.

हुड् (हुडृ—Set) 1 P. गतौ । to go, Caus. Aor अजुहोडत्—त.

हुंड् (हुडि—Set) 1 A. संघाते–वरणे–हरणेच । to collect, to select, to take away.

हुर्छ् (हुर्छा—Set) 1 P कौटिल्ये । to be crooked, to deceive, हूर्छति, Deri. हूर्छित, हूर्ण.

हुल् (Set) 1 P गतौ । to go.

हूड् (हूडृ–Set) 1 P. गतौ । to go, Caus Aor. अजुहूडत्—त

हृ (हृ–ञ्–Anit) 1 U. हरणे । to carry, to bring, to take, to steal, to acquire, to captivate, to charm, Act हरति–ते, जहार, जह्रे, जहर्थ, जह्रिषे, हर्तास्मि–हे, हरिष्यति—ते, अहरिष्यत् –त, अहार्षित्, अहृत, ह्रियासं, हृषीय, Pass ह्रियते, हरिष्यते or हारिष्यते, अहारि, Caus हारयति—ते, अजिहरत्—त, Desid जिहीर्षति—ते, Deri. हृत हर्तव्य, हार्य, हर्तुं, हृत्वा.

हृष् (हृषु—Set) 1 P. अलीके । to tell a lie. Caus Aor. अजहर्षत्—त or अजीहृषत्—त, Deri. हृष्ट, हृषित्वा or हृष्ट्वा, हर्षितुं.

हेट् { हेट / हेठ } Set 1 A विबाधायां । to be wicked, to vex, Caus Aor. अजीहिठत्–त, अजिहेठत्–त
हेठ्

हेड् (घटादि —Set) 1 P. वेष्टने । to surround, to clothe, Caus. हिडयति—ते, Pass हेड्यते, Aor अहिडि or अहीडि.

हेड् (हेडृ–Set) 1 A अनादरे । to disregard, Caus Aor अजिहेडत्–त.

हेष् (हेषृ—Set) 1 A अव्यक्ते शब्दे । to bray, to roar, (in general) to neigh (as a horse)

होड् (Set) 1 P चलने । to go, to move

होड् (होडृ—Set) 1 A. अनादरे । to disregard, Caus Aor अजुहोडत्–त.

ह्मल् (घटादिः—Set) 1 P. चलने । to shake, to go, Caus. ह्मलयति—ते or ह्मालयति–ते, when with a preposition, ह्मलयति–ते only.

ह्वग् (ह्वगे घटादि —Set) 1 P. संवरणे । to cover, to conceal, Aor. अह्वगीत्, Caus. ह्वगयति—ते

ह्वस् (Set) 1 P. शब्देलाघवेच । to sound, to become small, Aor. अह्वसीत् or अह्वासीत्

ह्राद् (ह्रादृ—Set) 1 A. अव्यक्तेशब्दे । to sound, to row.

ह्रीछ् (Set) 1 P लज्जायाम् । to be ashamed or modest, to blush,—ह्रीच्छति

ह्रेष् (ह्रेषृ—Set) 1 A. अव्यक्तेशब्दे । to neigh (as a horse), to go, to creep, Caus, Aor अजिह्रेषत्-त

ह्लग् (ह्लगे-घटादि -Set) 1 P. संवरणे । to cover, to conceal, Caus. ह्लगयति-ते, Aor. अह्लगीत्.

ह्लस् (Set) 1 P शब्दे । to sound, Aor अह्लसीत्, अह्लासीत.

ह्लाद् (ह्लादी-Set) 1 A अव्यक्तेशब्देसुखेच । to sound, to be glad, Deri. ह्लन्न

ह्वल् (Set) 1 P. चलने वैक्लव्येच । to move, to shake, to be confused, to be afflicted, Caus ह्वलयति—ते, ह्वालयति-ते. but with a preposition ह्वलयति—ते only.

ह्वृ (Anit) 1 P. कौटिल्ये । to be crooked, to deceive, ह्वर्तास्मि, ह्वरिष्यति, अह्वार्षीत्, ह्वर्यासं, Pass ह्वर्यते, Desid जुह्वूर्षति.

ह्वे (ह्वे—ञ्—Anit) 1 U स्पर्धायांशब्देच । to vie with, to challenge, to call, to ask, to invoke, Act ह्वयति-ते, अह्वयत्-त ह्वयतु-तां, ह्वयेयं-य, जुहाव, जुहुवे, ह्वातास्मि-हे, ह्वास्यति-ते, अह्वास्यत्—त, अह्वत्—त or अह्वास्त, हूयासं, ह्वासीय, Pass हूयते, ह्वास्यते or ह्वायिष्यते, अह्वायि, Caus ह्वाययति-ते, अजूहवत्—त or अजुहावत्—त, Desid जुहूषति—ते, Desid of the Caus. जुहावयिषति-ते, Deri. हूत, ह्वेय, ह्वातुं. हूत्वा, आहूय, ह्वयत्—मान, जुहुवस्—वान.

॥ इति शब्विकरणोभ्वादिगणः प्रथमः ॥

॥ अथलुग्विकरणोऽदादिगणोद्वितीयः ॥

अद् (Anit) 2 P भक्षणे । to eat, Act. अत्ति, आदत्, अत्तु, अद्धि, अद्यां, आद or जघास, आदिथ or जघसिथ, अत्तास्मि, अत्स्यति, आत्स्यत्, अघसत्—अद्यासं, Desid जिघत्सति, Deri जग्ध or अन्नं (food), अत्तुं, जग्ध्वा, प्रजग्ध्य, आदिवस् or जक्षिवस् .

अन् (Set) 2 P. प्राणने । to breathe. अनिति, आनीत् or आनत्, अनितु, अनिहि, अन्यां, आन, आनीत्

अस् (Set) 2 P भुवि । to be अस्ति, आसीत्, अस्तु, or स्तात् स्यां,

आस् (आस–Set) 2 A उपवेशने । to sit, to be. आस्ते, आस्तां, आस्त, आसीत, आसांचक्रे, आसिताहे, आसिष्ट, आसिषीय, Desid आसिसिषते, Deri आसीन, उपास्य.

इ (इ-ण् Anit) 2 P. गतौ । to go एति, ऐत्, एतु, इयात्, इयाय, एतास्मि, एष्यति, ऐष्यत्, अगात्, ईयासं, Pass. ईयते, एष्यते or आयिष्यते, अगायि, Caus गमयति–ते, (with प्रति–प्रत्याययति-ते) Aor. अजीगमत्–त, Desid जिगमिषति (with प्रति–प्रतीषिषति). Deri. इत, एतुं, इत्वा, उपेत्य, यत्, एष्यत्, ईयिवस्.

इ with अधि. (इ क्-Anit.) 2 P स्मरणे । to think of, to remember. अध्येति, अधीयाय, अध्येतास्मि अध्येष्यति, अध्यैष्यत्, अध्वगात्, अधीयासं Pass. अधीयते, Aor. अध्यगायि, Caus अधिगमयति—ते, Aor. अध्यजीगमत्—त Desid. अधिजिगमिषति, Deri. अधीत, अधीत्य, अध्येतुं.

इ with अधि (इ-ङ्-Anit.) 2 A. अध्ययने । to study, अधीते, अध्यैत, अधीता, अधीयीत, अधिजगे, अध्येताहे, अध्येष्यते, अध्यैष्ट, or अध्यगीष्ट, अध्येषीय, Pass अधीयते, अध्येषते or अध्यायिष्यते, अध्यगायि or अध्यायि Caus अध्यापयति, अध्यापिपत्, or अध्यजीगपत्, Desid. अधिजीगांसते, Desid of the Caus. अधिजिगापयिषति or अध्यापिपयिषति.

(Anit) 2 P. गति—व्याप्ति—प्रजन—कांत्यसन—खादनेषु । to go, to pervade, to conceive, to desire, to throw, to eat एति, अयां-

चकार, एतास्मि—एष्यति, ऐष्यत्, ऐषीत्, ईयासं, Deri ईत, एतुं, ईत्वा, अयत्, अयांचकृवस् .

ईड् (ईड–Set) 2 A. स्तुतौ । to praise, ईड्टे, ईडांचक्रे, ऐडिष्यत, ऐडिष्ट.

ईर् (ईर—Set) 2 A. गतौ कंपनेच । to go, to shake. ईर्ते, ईरांचक्रे, ऐरिष्यत, ऐरिष्ट.

ईश् (ईश—Set) 2 A. ऐश्वर्ये । to rule, to command, to possess power. ईष्टे, ईशांचक्रे, ऐशिष्यत्, ऐशिष्ट.

ऊर्णु (ऊर्णु—ञ्—Set) 2 U आच्छादने । to cover, (for conjugational forms see pages 73 and 74) ऊर्णुनाव—ऊर्णुनुवे, ऊर्णुनुविथ or ऊर्णुनविथ, ऊर्णुनुविषे, ऊर्णुवितास्मि–हे or ऊर्णवितास्मि—हे, और्णुविष्यत्–त or और्णविष्यत्–त, Perf और्णुवीत् or और्णवीत् or और्णावित्. ऊर्णूयासं—ऊर्णुविषीय or ऊर्णविषीय, Pass ऊर्णूयते, और्णावि, Caus ऊर्णावयति—ते, और्णूनवत्–त, Desid. ऊर्णुनूषति—ते or ऊर्णुनुविषति–ते or ऊर्णुनविषति–ते, Deri. ऊर्णुत, ऊर्णुवितव्य or ऊर्णवितव्य, ऊर्णुवितुं or ऊर्णवितुं, ऊर्णुवित्वा or ऊर्णवित्वा, ऊर्णुनुवस्–ऊर्णुनुवान.

कश् { कश } Set 2 A गतिशासनयो । to go, to punish कष्टे, चकशे,
कस् { कस }

कंस् (कसि—Set) 2 A. गतिशासनयो । to go, to destroy. कंस्ते, चकंसे.

कु (Anit) 2 P. शब्दे । to hum, Act कौति, अकौत्, कौतु, कुहि, कुयां, चुकाव, चुकोथ or चुकविथ, कोतास्मि, कोष्यति, अकोषीत्, कूयासं

क्षु (टुक्षु–Set) 2 P. शब्दे । to sneeze, Act. क्षवितास्मि, क्षविष्यति, अक्षविष्यत्–अक्षावीत्.

क्ष्णु (Set) 2 P. तेजने । to whet, (with सं A.)

ख्या (Anit) 2 P प्रकथने । to relate, to tell, Act. ख्याति, अख्यात्, अख्यान् or अख्युः ख्यातु, ख्याहि, ख्यायां, चख्यौ–ख्ये, ख्यातास्मि–हे, ख्यास्यति—ते, अख्यास्यत्–त, अख्यत्–त, ख्यायासं or ख्येयासं, ख्यासीय. Caus ख्यापयति–ते, अचिख्यपत्–त, Desid. चिख्यासति–ते.

चकास् (चकासृ–Set) 2 P. दीप्तौ । to shine, to be bright or prosperous. चकास्ति, चकासति, अचकात्—द्, चकाधि or चकाद्धि, Caus. Aor. अचचकासत्-त or अचीचकासत्-त.

चक्ष् (चाक्षि–ङ्—Set) 2 A. व्यक्तायांवाचि । दर्शनेऽपि । to speak, to tell, to see (This root is defective in all non-conjugational tenses and subsitutes ख्या or क्शा (U.) except when it means 'to shun') चष्टे, चक्षते, चचक्षे or चख्यौ–ख्ये or चक्शौ-क्शे, ख्यातास्मि—हे or क्शातास्मि—हे, अख्यत्-त or अक्शासीत्—अक्शास्त, ख्यायासं or ख्येयासं or क्शायासं or क्शेयासं, ख्यासीय or क्शासीय, Pass. ख्यायते or क्शायते, Caus ख्यापयति—ते or क्शापयति-ते, Desid चिख्यासति-ते, Deri. ख्यात or क्शात, ख्यातुं or क्शातुं, ख्यात्वा or क्शात्वा.

जक्ष् (Set) 2 P भक्ष—हसनयोः । to eat; to cousume, to laugh. जक्षिति, जक्षति, अजक्षत् or अजक्षीत्, अजक्ष or अजक्षी, जक्षितु, जक्ष्यां, जजक्ष, जजाक्षिथ ; अजक्षीत्.

जागृ (Set) 2 P. निद्राक्षये । to be awake or watchful. जागर्ति, जाग्रति, अजाग, अजागरु, जागर्तु, जाग्रतु, जागृहि, जागृयां, जजागार or जागरांचकार, जागरितास्मि, जागरिष्यति, अजागरिष्यत्, अजागरीत्; जागर्यासं, Pass. जागर्यते, अजागारि, Caus. जागरयति-ते; अजजागरत्—त; Desid जिजागरिषति, Deri. जागरित; जागरितुं; जागरित्वा ; जजागृवस् or जजागर्वस् or जागरांचकृवस्.

तु (a sautra root—Anit) 2 P. गति—वृद्धि—हिंसासु । to go, to grow, to kill, Act. तौति or तवीति, अतौत् or अतवीत्, तौतु or तवीतु, तुयां or तुवीयां, तुताव, तुतोथ or तुतविथ, तोतास्मि-तोष्यति, अतोष्यत्, अतौषीत्, तूयासं, Pass. तूयते, अतावि, Caus तावयति-ते, अतूतवत्—त, Desid. तुतूषति, Deri. तुत, तोतुं, तुत्वा, तुवत्, तुतुवस्

दरिद्रा (Set) 2 P. दुर्गतौ । to be poor, to be distressed. दरिद्राति, दरिद्रति; अदरिद्रात्, अदरिद्रु दरिद्रातु, दरिद्रिहि, दरिद्रियात् ददरिद्रौ or दरिद्रांचकार, दरिद्रितास्मि, अदरिद्रीत् or अदरिद्रासीत्, दरिद्र्यासं, Pass. दरिद्र्यते, अदरिद्रायि, Caus. दरिद्रयति-ते Desid दिदरिद्रासति or दिदरिद्रिषति; Deri. दरिद्रित, दरिद्रित्वा, दरिद्रितुं, दरिद्रत्, ददरिद्रिवस् or दरिद्रांचकृवस्

दा (दा—प्—Anit) 2 P. लवने । to cut दाति, अदात् or दू, अदु or अदान्, दातु, दाहि; दायां, ददौ, ददिथ or ददाथ, दातास्मि, दास्यति, अदास्यत्, अदासीत्, दायासं, Pass दायते, अदायि, Caus दापयति-ते, अदीदपत्-त, Desid दिदासति, Deri. दात; दात्वा; अवदाय, दातुं, दात्, ददिवस्

दिह् (दिहँ—Anit) 2 U उपचये । to increase, to anoint, smear; to soil देग्धि-दिग्धे, दिहन्ति-दिहते, धेक्षि-धिक्षे, दिग्ध—धिग्ध्वे, अधेक्-आदिग्ध, देग्धु-दिग्धां, दिग्धि—धिक्ष्व, दिह्यां—दिहीय, दिदेह-दिदिहे, दिदेहिथ-दिदिहिषे, देग्धास्मि-हे, धेक्ष्यति-ते, अधेक्ष्यत्—त; अधिक्षत्—अधिक्षत or अदिग्ध, दिह्यासं—धिक्षीय, Pass दिह्यते; अदेहि, Caus देहयति-ते, अदिदिहत्—त, Desid दिधिक्षति-ते, Deri. दिग्ध, दिग्धुं, दिग्ध्वा, धेक्ष्यत्-माण, दिदिह्वस-दिदिहान.

दीधी (दीधी—ङ् —छान्दस·—Set) 2 P दीप्ति—देवनयो । to shine, to appear, दीधीते, दीध्यांचक्रे, दीधिताहे, दीधिष्यते, अदीधिष्ट, दीधिषीय

दुह् (दुहँ-Anit) 2 U प्रपूरणे । to milk, to extract, to yield. दोग्धि-दुग्धे, दुहन्ति—दुहते, धोक्षि—धुक्षे, दुग्ध-धुग्ध्वे, अधोक्—. अदुग्ध, दोग्धु-दुग्धां, दुग्धि-धुक्ष्व, दुह्यां-दुहीय, दुदोह-दुदुहे, दुदोहिथ—दुदुहिषे; दोग्धास्मि-हे, धोक्ष्यति-ते, अधोक्ष्यत्-त, अधुक्षत्-त, or अदुग्ध, दुह्यासं-धुक्षीय, Pass. दुह्यते, also दुग्धे, अदोहि also अधुक्षत or अदुग्ध, Caus दोहयति-ते, अदूदुहत्-त, Desid. दुधुक्षति-ते, Deri दुग्ध, दुह्य, or दोह्य, दोग्धुं, दुग्ध्वा, धोक्ष्यत्-माण, दुदुह्वस्-दुदुहान.

द्यु (Anit) 2 P अभिगमने । to assail, to advance towards. द्यौति, अद्यौत, द्यौतु, द्युहि; द्युयां; दुद्याव, दुद्यविथ; दुद्योथ; द्योतास्मि-द्योष्यति, अद्योष्यत्-अद्यौषीत्; द्यूयासं, Pass द्यूयते, द्योष्यते; or द्याविष्यते, अद्यावि, Caus द्यावयति—ते, अदुद्यवत्—त, Desid दुद्यूषति, Deri द्युत, द्यव्य or द्याव्य, द्योतुं, द्युत्वा, दुद्युवस्

द्रा (Anit) 2 P कुत्सायां गतौ स्वप्नेच । to run, to fly, to be spoiled, to sleep, Bene. द्रायासं or द्रेयासं; Deri द्राण, निद्राय.

द्विष् (द्विषँ—Anit) 2 U अप्रीतौ । to hate, to dislike. द्वेष्टि—द्विष्टे; अद्वेट्—अद्वेड्, आद्विष्ट, आद्विषन्—अद्विषु॰, अद्विषत, द्वेष्टु-द्विष्टां; द्विष्यां-

द्विषीय, दिद्वेष-दिद्विषे, द्वेष्टास्मि—हे, द्वेक्ष्यति—ते, अद्वेक्ष्यत्—त, अद्विक्षत्—त, द्विष्यासं—द्विक्षीय, Pass द्विष्यते, द्वेक्ष्यते, अद्वेषि, Desid. दिद्विक्षति—ते, Deri. द्विष्ट, द्वेष्टुं, द्विष्ट्वा.

निज् (णिजि—Set) 2 A. शुद्धौ। to wash, निंक्ते, अनिंक्त, निंक्तां, निंजीय, निनिंजे, निंजिताहे, अनिंजिष्ट, निंजिषीय.

निंस् (णिसि-Set) 2 A चुंबने। to kiss निंस्ते, निनिंसे, निंसिताहे, अनिंसिष्ट, निंसिषीय.

नु (णु-Set) 2 P. स्तुतौ। to praise. (A. with आ) नौति—नुते, अनौत्—अनुत, नौतु—नुतां, नुहि—नुष्व, नुयां—नुवीयां, नुनाव-नुनुवे, नुनविथ-नुनुविषे, नवितास्मि—हे, नविष्यति—ते, अनावीत्-अनविष्ट, नूयासं-नविषीय, Pass नूयते, नविष्यते, or नाविष्यते, अनावि, Caus. नावयति—ते, Desid. नुनूषति—ते, Deri नुत, नव्य or नाव्य or नवितव्य, नवितु, नुत्वा.

पा (Anit) 2 P रक्षणे। to protect, to govern, to preserve. पाति, अपात्, अपान्-अपु, अपासीत्, पायासं Caus. पालयति—ते अपीपलत्—त, Desid. पिपासति, Deri पात, पात्वा, पातु.

पिंज् (पिजि—Set) 2 A वर्णे-संपर्चने—अवयवे—अव्यक्ते शब्दे च। to tinge, to colour, to join, to divide, to speak inarticulately. पिंक्ते, पिपिंजे, पिंजिताहे, पिंजिष्यते, अपिंजिष्ट, पिंजिषीय.

पृच् (पृची—Set) 2 A संपर्चने। to come in contact with, to touch. पृक्ते, पृचाते, पृक्षे, पृग्ध्वे, अपृक्त; पृक्तां, पृचीय, पपृचे, पपृचिषे, पर्चिताहे, पर्चिष्यते, अपर्चिष्यत, अपर्चिष्ट, पर्चिषीय, Caus. Aor. अपपर्चत्—त or अपीपृचत्—त, Desid पिपर्चिषते, Deri. पृक्त, पर्चित्वा, पर्चितुं, पृचान.

पृंज् (पृजि Set) 2 A. वर्णे। to dye. पृंक्ते, पपृंजे, पृंजिताहे, अपृंजिष्ट, पृंजिषीय.

प्रा (Anit) 2 P. पूरणे। to fill, Bene. प्रायात् or प्रेयात्.

प्सा (Anit) 2 P. भक्षणे। to devour, to eat, Bene. प्सायासं or प्सेयासं.

ब्रू (ब्रूं—ब्रू—Set) 2 U व्यक्तायांवाचि । to speak, to say, to tell. ब्रवीति (आह)-ब्रूते, अब्रवीत्-अब्रूत, ब्रवीतु—ब्रूतां, ब्रूहि-ब्रूष्व, ब्रूयां-ब्रुवीय, Pre P ब्रुवत्, ब्रुवाण. This is a defective root and has no forms in the non-Conjugational tenses, Passive, Causal, Desiderative, etc. for which the forms of वच् are substituted उवाच, ऊचे, वक्तास्मि-हे, वक्ष्यति—ते, अवोचत्—त, उच्यासं, वक्षीय, Pass उच्यते, अवाचि, Caus वाचयति—ते, अवीवचत्-त, Desid विवक्षति—ते, Deri उक्त, उक्त्वा, वक्तुं.

भा (Anit) 2 P दीप्तौ । to shine, to appear, to be

मा (Anit) 2 P. माने । to measure, to limit. Bene मेयासं, Pass मीयते, मास्यते, or मायिष्यते, Desid मित्सति, Deri मित, मातव्य, मेय, मातुं, मित्वा, उन्माय.

मृज् (मृजू—Wet) 2 P. शुद्धौ । to cleanse, to purify, to wipe off. मार्ष्टि, मृजन्ति or मार्जन्ति, अमार्ट्-ड्, मार्ष्टु, मृड्ढि, मृजंतु or मार्जंतु, मृज्यां, Pre P. मार्जत् or मृजत् The remaining forms are like those of मृज् 1 P

या (Anit) 2 P प्रापणे । to go, to attend to, to go or pass away; to attempt, to perceive.

यु (Set) 2 P मिश्रणेऽमिश्रणेच । to mix, to join, to separate, Desid. युयूषति or यियविषति, Desid of the Caus यियावयिषति-ते, Deri युत, यव्य or याव्य, यवितव्य, यवितुं, युत्वा, युयुवस्.

रा (Anit) 2 P दाने । to give, to grant.

रु (Set) 2 P. शब्दे । to cry, to roar, to shout; to sound. रौति or रवीति, अरौत् or अरवीत्, रौतु or रवीतु, रुहि or रुवीहि, रुयां or रुवीयां, रुराव, रवितास्मि, रविष्यति, अरविष्यत्, अरावीत्, रूयासं, Pass रूयते, रविष्यते or राविष्यते. अरावि, Caus. रावयति—ते, अरीरवत्—त, Desid रुरूषति, Desid. of Caus. रिरावयिषति—ते, Deri रुत, रव्य or राव्य, रवितुं, रुत्वा.

रुद् (रुदिर्—Set) 2 P अश्रुविमोचने । to shed tears, to cry, to weep, to lament रोदिति, अरोदीत् or अरोदत्, रोदितु, रुदिहि, रुद्यां, रुरोद, रुरोदिथ, रोदितास्मि, रोदिष्यति, अरोदिष्यत्, अरुदत् or अरोदीत्, रुद्यासं.

ला (Anit) 2 P आदाने दानेच । to take; to give, to melt, Caus. लापयति—ते. In the last sense, लालयति-ते, Deri लात, लास्यत्, ललिवस्.

लिह् (लिह्—Anit) 2 U आस्वादने । to lick, to taste लेढि—लीढे, लेक्षि-लिक्षे, अलेट्—अलिढ, लेढु-लीढां, लीढि—लिक्ष्व, लिह्यां-लिहीय, लिलेह—लिलिहे, लेढास्मि—हे, लेक्ष्यति—ते, अलेक्ष्यत्-त, अलिक्षत्-त or अलीढ, लिह्यासं-लिक्षीय, Desid. लिलिक्षति-ते, Deri. लीढ, लेढव्य, लेह्य, लेढुं, लीढ्वा.

वच् (Anit) 2 P (but U. in the non—Conjugational tenses). परिभाषणे । to speak, to read, to name; to call, to announce, वक्ति, वक्षि, वक्तु, वग्धि, वच्यां (For other forms see ब्रू).

वश् (Set) 2 P कांतौ । to wish, to long for वष्टि, अवट्, वष्टु उड्ढि, उश्यां, उवाश, वशितास्मि. अवशीत् or अवाशीत्, उश्यासं, Pass. उश्यते, Deri उशित, वशितुं-वशित्वा, ऊशिवस्

वस् (वस—Set) 2 A आच्छादने । to wear, to dress वस्ते, अवस्त, वस्तां, वसीय, ववसे, वसिताहे, Deri वसित, वसितुं, वसित्वा

वा (Anit) 2 P. गतिगंधनयो । to go; to blow, to hurt; to injure, to kill, to move, Caus वापयति-ते In the last sense, वाजयति-ते

विद् (Set) 2 P ज्ञाने । to know, to learn, to find out, to consider, (A. with सं to recognize) वेत्ति, वित्ते, वेद, वेत्तु-विदांकरोतु, विवेद, विदांचकार, वेदितास्मि-हे, वेदिष्यति—ते, अवेदीत्, अवेदिष्ट, विद्यासं, वेदिषीय.

वी (Anit) 2 P गति—व्याप्ति—प्रजनन—कांत्यसन—खादनेषु । to go; to pervade; to be born, to be impregnate, to desire, to throw, to eat, to conceive वेति, अवेत्, अवियत् or अव्यत्, वेतु, वीहि, वीयां, विवाय, वेतास्मि, अवेषीत्, वीयासं, Pass वीयते, Caus. वाययति-ते In the last sense, वापयति—ते.

वृज् (वृजी-Set) 2 A वर्जने । to avoid, to abandon. वृक्ते, वृजते, वृक्षे, वृग्ध्वे, अवृक्त, वृक्तां, वृजीय, ववृजे, वर्जिताहे, वर्जिष्यते, अवर्जिष्ट, वर्जिषीय, Caus Aor. अवीवृजत्-त or अववर्जत्-त Desid. विवर्जिषते.

वृज् (वृजि—Set) 2 A वर्जने । to avoid, to abandon वृक्ते, ववृजे, वृजिताहे, अवृजिष्ट, वृजिषीय.

वेवी (वेवी—ङ्—a Vedic root-Set) 2 A. गति-व्याप्ति-प्रजनन—कान्त्यसन-खादनेषु । to go, to pervade, to be born, to impregnate, to desire, to throw, to eat वेवित्ते, वेव्यांचक्रे, वेविताहे, वेविष्यते, अवेविष्ट, वेविषीय.

शास् (शासु—Set) 2 P अनुशिष्टौ । to teach, to inform, to rule, to command, to punish, to advise शास्ति, अशात्-अशाद्, शास्तु शास्तु, शाधि, शिष्यां, शशास, शासितास्मि, शासिष्यति, अशासिष्यत् अशिषत्, शिष्यासं, Pass शिष्यते, शासिष्यते, अशासि, Caus Aor. अशशासत्-त, Desid शिशासिषति, Deri शिष्ट, शिष्य, शासित्वा, or शिष्ट्वा, अनुशिष्य

शास् (आङ्.शासु-Set) 2 A इच्छायाम् । to desire, to seek, to bless, to praise, (generally with आ) आशास्ते आशशासे, आशासिताहे, आशासिष्ट, आशासिषीय, Pass शास्यते

शिंज् (शिजि—Set) 2 A अव्यक्ते शब्दे । to tinkle, to rattle, to whisper शिंजते, शिशिंजे शिंजिताहे, शिंजिष्यते, अशिंजिष्ट शिंजिषीय

शी (शी ङ्—Set) 2 A स्वप्ने । to sleep, to lie down शेते, शेरते, अशेत, अशेरत, शेता, शेरतां, शयीय, शिश्ये, शयिताहे, शयिष्यते अशयिष्ट, शयिषीय. Pass शय्यते, शयिष्यते, or शायिष्यते, अशायि Caus शाययति—ते, अशीशयत्—त Desid शिशयिषते Deri शयित, शेय, शयितु, शयित्वा.

श्रा (घटादि —Anit) 2 P पाके । to cook, to boil, Bene श्रेयासं or श्रायासं, Caus. श्रपयति–ते, अशिश्रपत्–त, Deri श्राण, शृत श्रातुं, श्रात्वा, शश्रिवस्

श्वस् (Set) 2 P. प्राणने । to breathe, to sigh, to hiss. श्वसिति, अश्वसीत् , अश्वसत्, श्वसितु, श्वसिहि, श्वस्यां, शश्वास, श्वसितास्मि, अश्वसीत , श्वस्यासं , Caus श्वासयति,–ते अशिश्वसत्-त, Deri. श्वसित, आश्वस्त, विश्वस्त, श्वसित्वा, आश्वस्य, विश्वस्य, श्वसितुं.

सस् (षस्—a Vedic root–Set) 2 P स्वप्ने । to sleep सस्ति, असत्, सधि, ससास, ससितास्मि, अससीत् or असासीत्, Caus. सासयति-ते असीषसत्-त, Desid सिससिषति

संस्त (सस्ति—a Vedic-root-Set) 2 P. स्वप्ने । to sleep, सति, संस्ति सत , संस्त , संस्तन्ति, ससंस्त, सस्तितास्मि, सस्तिष्यति, असंस्तीत्, संस्त्यास

सु (षु–Anit.) 2 P प्रसवैश्वर्ययोः । to bring forth, to possess supremacy, to permit, सौति, असौत्, सौतु, सुहि, सुयां, सुषाव, सोतास्मि, सोष्यति, असौषीत् or असावीत्, सूयासं, Caus सावयति-ते, असूषवत्-त, Pre P सुवत्.

सू (षू-ङ्–Wet) 2 A प्राणिगर्भविमोचने । to bring forth as a child, सूते, सुषुवे, सोताहे, or सविताहे, सोष्यते or सविष्यते, असोष्यत or असविष्यत, असोष्ट or असविष्ट, सविषीय or सोषीय, Caus Aor. असूषवत्-त, Deri सूत, सोतव्य or सवितव्य, सव्य or साव्य, सोतुं or सवितुं.

स्तु (ष्टुं–ञ्–Anit) 2 U स्तुतौ । to praise, to glorify, to worship by hymns स्तौति, स्तवीति, स्तुते, स्तुवीते, तुष्टाव, तुष्टुवे, स्तोतास्मि, —हे, अस्तावीत्-अस्तोष्ट, स्तूयास, स्तोषीय, Caus स्तावयति-ते, अतुष्टवत्—त, Desid तुष्टुषति-ते.

स्ना (ष्णा–Anit) 2 P शौचे । to bathe स्नाति, अस्नात्–द्, अस्नान् अस्नु , स्नातु, स्नाहि, स्नायां, सस्नौ, सस्निथ, सस्नाथ, स्नातास्मि, अस्नासीत्, स्नायात् or स्नेयात्, Caus स्नापयति–ते or स्नपयति–ते, (with prepositions स्नापयति—ते only), असिष्णपत्—त, Desid सिष्णासति, Deri स्नात ; निष्णात (skilled in).

स्नु (ष्णु—Set) 2 P प्रस्रवणे । to ooze, स्नौति, सुष्णाव, स्नवितास्मि, अस्नावीत्, स्नूयासं, Pass स्नूयते also स्नुते Caus स्नावयति—ते, असुष्णवत्—त.


स्वप् (ञि—ष्वप्—Anit) 2 P शये । to sleep, to lie down, स्वपिति, अस्वपीत् or अस्वपत् अस्वपीः or अस्वपः स्वपितु, स्वपिहि, स्वप्यां, सुष्वाप, सुष्वपिथ, सुष्वप्थ, स्वप्तास्मि, स्वप्स्यति, अस्वाप्सीत्, सुप्यासं,

Pass सुप्यते, स्वप्स्यते, अस्वापि, Caus स्वापयति-ते, असिष्वपत्-त, Desid सुषुप्सति, Deri सुप्त, सुषुप्त, विषुप्त, सुप्त्वा, प्रसुप्य, स्वप्तुं

हन् (Anit) 2 P (but A after आ) हिंसागत्योः। to kill, to go, हन्ति—हते, अहन्—अहत, हन्तु-हतां, जहि, हस्व, हन्यां, घ्नीय, जघान, जघनिथ, जघंथ, हंतास्मि-हे, हनिष्यति—ते, अहनिष्यत्—त, अवधीत्, अहत or अवधिष्ट, वध्यास, वधिषीय, Pass हन्यते, हनिष्यते or घानिष्यते, अघानि or अवधि, Caus. घातयति—ते, अजीघनत्-त, Desid. जिघांसति-ते Deri हत, हंतव्य, घात्य or वध्य, हंतु, हत्वा, निहत्य घत्, घ्नानं, हनिष्यत्, जघन्वस् or जघ्निवस्—जघ्नान.

ह्नु (ह्नु—ङ्—Anit) 2 A अपनयने। to conceal, to take away, to deny. ह्नुते, अह्नुत, ह्नुतां, ह्नुवीय, जुह्नुवे, ह्नोताहे, ह्नोष्यते, अह्नोष्ट, ह्नोषीय.

॥ अथश्लु-विकरणोजुहोत्यादिगणस्तृतीयः ॥



ऋ (Anit) 3 P गतौ। to go (A with सं to join) इयर्ति; इयर्तु; ऐय, इयृयात्, आरत्, (other forms are like those of ऋ 1 P.)

कि (a Vedic root–Anit) 3 P. ज्ञाने। to know चिकेति, चिकेतु, अचिकेत्, चिकियात् चिकाय, अकैषीत्.

गा (a Vedic root–Anit) 3 P स्तुतौजन्मनिच। to praise, to be born जिगाति, जिगातु, अजिगात्, जिगीयात्; जगौ, गातास्मि, गास्यति, अगासीत्, गायासं.

घृ (a Vedic root–Anit) 3 P क्षरणदीप्त्योः। sprinkle, to shine जिघर्ति, जिघर्तु, अजिघ, जिघृयात्, जघार, घर्तास्मि, घरिष्यति, अघार्षीत्, घ्रियासं.

जन् (a Vedic root—Set) 3 P जनने। to be born जजंति; जजात! जज्ञति, जजंतु, अजजन्, जजन्यात्, जजायात्, जजान, जन्यासं; जायासं

तुर् (a Vedic root—Set) 3 P. त्वरणे। to make haste. तुतोर्ति, तुतोर्तु; अतुतोः, तुतूर्यति; तुतोर; अतोरीत्

दा (डु-दा—ञ्—Anit) 3 U दाने to give ददाति, दत्ते, ददति-ददते; अददात्—अदत्त, ददातु, दत्तां—देहि, दत्स्व, दद्यां-ददीय. (other forms are like those of दा 1. P.)

धन् (a Vedic root-Set) 3 P धान्ये । to bear fruit, to produce crops of grain दधन्ति, दधन्तु, अदधन्, दधन्यात्; दधान; धनितास्मि, धनिष्यति, अधनीत् or अधानीत्, धन्यासं.

धा (डु-धा-ञ्-Anit) 3 U धारण-पोषणयो । दानेच । to hold, to put, to maintain, to give, to grant, to bear, to assume, to have दधाति-धत्ते, दधातु-धत्तां, अदधात्-अधत्त, दध्यात्-दधीत, दधौ-दधे, दधिथ or दधाथ-दधिषे, धातास्मि—हे, धास्यति-ते, अधास्यत्-त, अधात्-अधित, धेयासं—धासीय, Prss धीयते, धास्यते, or धायिष्यते, अधायि Caus धापयति—ते, अदीधपत्-त, Desid धित्सति-ते, Deri हित, धेय, धातुं, हित्वा, दधत्, दधान, दधिवस् —दधान.

धिष् (a Vedic root-Set) 3 P. शब्दे । to sound दिधेष्टि, दिधेष्टु; दिधिषाणि, दिधिषाव, दिधिषाम, अदिधेट्-ड्, दिधिष्यात्, दिधेष; धेषितास्मि, धेषिष्यति, अधेषीत्, धिष्यासं

निज् (णिजिर्—Anit) 3 U शौच—पोषणयो. । to wash, to purify, to nourish नेनेक्ति-नेनिक्ते, नेनेक्तु-नेनिक्ता, अनेनेक् or ग्— अनेनिक्त, नेनिज्यात्—नेनिजीत, निनेज—निनिजे, निनेजिथ, निनिजिषे, नेक्तास्मि—हे; नेक्ष्यति-ते, अनेक्ष्यत्—त, अनिजत or अनैक्षीत् —अनिक्त, निज्यासं—निक्षीय; Deri निक्त, निज्य, नेक्तुं, निक्त्वा.

पृ (Anit) 3 P पालनपूरणयो । to protect, to fill, to promote, to deliver पिपर्ति पिपर्तु अपिपः, पिपृयात्, पपार पपर्थ, पर्तास्मि. परिष्यति अपार्षीत्. प्रियासं. Pass प्रियते. परिष्यते or पारिष्यते अपारि Caus पारयति—ते. अपीपरत्-त Desid पुपूर्षति Deri. पृत पार्य or पृत्य. पर्तुं. पृत्वा.

पॄ (Set) 3 P पालनपूरणयो. । to protect, to fill, to gratify (as hopes), to blow (as conch or flute) पिपर्ति. पिपूर्त . पिपर्तु. पिपूर्ता. अपिपः, आपिपूर्ता. पिपूर्यात्. पपार. पपरु or पप्रु., परि(री)तास्मि. परि(री)ष्यति. अपरि(री)ष्यत् अपारीत्. पूर्यासं Pass.

पूर्यते. परि(री)ष्यते or पारिष्यते अपारि. Desid पिपरि(री)-षति or पुपूर्षति. Deri पूर्ण. परि(री)तुं, पूर्त्वा, प्रपूर्य. पुपुर्वस् or पप्रुवस्

भस् (a Vedic root—Set) 3 P भर्त्सन-दीप्त्यो: । to censure, to blame, to shine बभस्ति बभस्तु अबभ:, बप्स्यात्, बभास भसितास्मि. भसिष्यति. अभसीत् or अभासीत् भस्यासं.

भी (ञि-भी–Anit) 3 P भये । to fear, to be afraid of, to be anxious about बिभेति बिभीत or बिभित , बिभ्यति. बिभेतु. बिभीतां or बिभितां बिभ्यतु. अबिभेत् अबिभी(भि)ताम्. अबिभयु , बिभी(भि)यात् बिभाय or बिभयांचकार. बिभेथ बिभयिथ or बिभयाचकर्थ भेतास्मि. भेष्यति अभेष्यत् अभैषीत् भीयासं Caus. भाययति or भाषयते or भीषयते. अबीभयत् अबीभषत. अबीभिषत. Desid. बिभीषति Deri भीत. भीत्वा भेतुं

भृ (डु-भृ-ञ्—Anit) 3 U धारणपोषणयो । to bear. to support, to nourish, to protect, to produce, to bestow, to hire बिभर्ति-बिभृते, बिभर्तु—बिभृता अबिभ -अबिभृत. बिभृयात्-बिभ्रीत. बभार बभ्रे or बिभ्राचकार—चक्रे. (Other forms are like भृ 1 P the Desid being बुभूर्षति—ते only)

मा (मा-ङ्—Anit) 3 A माने । to measure, to weigh, to limit, to compare in size मिमीते मिमीता अमिमीत ममे ममिषे. माताहे. मास्यते. अमास्यत. अमास्त मासीय Desid मित्सते

विज् (विजिर्—Anit) 3 U पृथग्भावे । to separate, to divide, to distinguish, to discern वेवेक्ति-वेविक्ते. वेवेक्तु—वेविक्तां अवेवेक् or ग्—अवेविक्त. वेविज्यात्—वेविजीत. विवेज-विविजे. वेक्तास्मि-हे. वेक्ष्यति—ते अविजत् or अवैक्षीत्-अविक्त विज्यासं. विक्षीय. Desid विविक्षति-ते Deri विक्त वेक्तुं. विक्त्वा.

विष् (विष्लृ–Anit) 3 U. व्याप्तौ to pervade. वेवेष्टि—वेविष्टे. वेवेष्टु—वेविष्टां. अवेवेट्-ड-अवेविष्ट. वेविष्यत-वेविषीत. विवेष—विविषे. वेष्टास्मि-हे वेक्ष्यति-ते. अविषत्-अविक्षत. विष्यासं—विक्षीय Deri. विष्ट वेष्टुं. विष्ट्वा.

सृ (a Vedic root-Anit) 3 P. गतौ । to go. ससर्ति. अससः, ससर्तु. ससृयात्. ससार. ससर्थ सर्तास्मि. सरिष्यति. असरत्. स्रियासं. (Other froms are like those of सृ 1 P)

हा (ओ-हा-क्-Anit) 3 P त्यागे । to abandon, to leave, to desert, to omit, to neglect जहाति. जही(हि)त. जहति अजहात् अजही(हि)ताम्, अजहु जहातु. जही(हि)तां जहाहि. जही-(हि)हि, जहतु जह्यात्. जहौ जहिथ हातास्मि. हास्यति. अहासीत्. हेयास. Pass हीयते Caus. हापयति-ते अजीहपत्-त. Desid. जिहासति. Deri हीन. हातुं. हित्वा.

हा (ओ-हा-ङ्-Anit) 3 A गतौ । to go, to attain जिहीते. अजिहीत. जिहीता. जिहीत जहे जहिषे हाताहे. हास्यते अहास्त Deri. हान. हेय हातुं. हात्वा

हु (Anit) 3 P दानादनयोः । प्रीणनेपि । to sacrifice, to eat, to please जुहोति. जुह्वति अजुहोत् अजुहवु, जुहोतु जुह्वतु जुहधि जुहुयां जुहाव. जुहवांचकार. जुहविथ or जुहोथ or जुहुवांचकर्थ. होतास्मि होष्यति अहोष्यत् अहौषीत् हूयासं. Caus हावयति—ते. अजूहवत्—त Desid जुहूषति. Deri हुत हुत्वा. होतुं.

हृ (a Vedic root-Anit) 3 P प्रसह्यकरणे । to take forcibly. जिहर्ति, अजिह, जिहर्तु, जिहृयात्, (other forms are like those of हृ 1 P)

ह्री (Anit) 3 P लज्जायाम् । to blush, to be ashamed जिह्रेति, जिह्रियति, अजिह्रेत्, अजिह्रयु, जिह्रेतु, जिह्रियतु, जिह्रीयात्, जिह्रीय, जिह्रयांचकार, ह्रेतास्मि, ह्रेष्यति, अह्रैषीत्, Caus ह्रेपयति—ते, अजिह्रिपत्-त, Desid. जिह्रीषति, Deri ह्रीत or ह्रीण, ह्रेतुं, ह्रित्वा.

॥ अथ श्यन् विकरणो दिवादिगणश्चतुर्थः ॥

अण् (अण—Set) 4 A प्राणने । to breathe, अण्यते, आणे, अणिताहे, अणिष्यते, आणिष्यत, आणिष्ट, अणिषीय, Pass अण्यते, अणिष्यते, आणि Caus. आणयति—ते. आणिणत्—त; Desid अणिणिषते; Deri अणित अणितुं अणित्वा.

अन् (अन—Set) 4 A प्राणने । to breathe

अस् (असु–Set) 4 P क्षेपणे । to throw, (U. with any preposition) अस्यति–ते, आस–आसे, असितास्मि–हे, असिष्यति—ते आस्यत्—त, अस्यां, असिषीय, Pass अस्यते, असिष्यते, आसि, Caus आसयति—ते, आसिसत्—त, Desid असिसिषति—ते, Deri. अस्त, असितुं, असित्वा or अस्त्वा, आसिवस्—आसान.

इष् (Set) 4 P. गतौ । to go, इष्यति, इयेष, एषितास्मि, एषिष्यति, ऐषिष्यत्, ऐषीत, इष्यासं.

ई (ई-ङ्—Anit) 4 A गतौ । to go, ईयते, ऐयत, ईयतां, अयांचक्रे, एताहे, एष्यते, ऐष्यत, ऐष्ट, ऐषीय, Caus आययति–ते, आयियत्–त, Desid इयीषते, Deri ईत, एतुं, ईत्वा

उच् (Set) 4 P समवाये । to be gathered together.

ऋध् (ऋधु—Set) 4 P. वृद्धौ । to increase, to prosper, ऋध्यति, आर्ध्यत्, ऋध्यतु, आनर्ध, अर्धितास्मि, अर्धिष्यति, अर्धिष्यत्, आर्धीत, ऋध्यासं, Desid अर्दिधिषति, ईर्त्सति, Deri. ऋद्ध, अर्धित्वा, ऋध्वा, अर्धितुं.

काश् (काशृ—Set) 4 A दीप्तौ । to shine, काश्यते (Other forms are like those of काश् 1 A)

कुट् (Set) 4 P कुट्टने । to break into pieces.

कुथ् (Set) 4 P पूतीभावे । to become putrid

कुप् (Set) 4. P क्रोधे । to be angry, Desid चुकोपिषति or चुकुपिषति, Deri कुपित्वा or कोपित्वा

कुस् (Set) 4 P संश्लेषणे । to embrace, to surround Desid चुकुसिषति or चुकोसिषति, Deri कुसित्वा or कोसित्वा, कुसितुं or कोसितुं

कृश् (Set) 4 P तनूकरणे । to make or become emaciated, Caus Aor अचकर्शत्–त or अचीकृशत्—त, Deri कृश, प्रकृशित, कर्शितुं, कृशित्वा or कर्शित्वा.

क्रस् (क्रसृ–घटादि—Set) 4 P ह्वरणदीप्त्योः । to be crooked in mind or body, to shine, Aor. अक्रसीत् or अक्रासीत्, Deri. क्रस्त, क्रसित्वा or क्रस्त्वा, क्रसितुं.

क्रुध् (Anit) 4 P क्रोधे । to be angry, F. क्रोद्धास्मि, क्रोत्स्यति, अक्रोत्स्यत्, अक्रुधत्, क्रुध्यासं, Desid चुक्रुत्सति, Deri क्रुद्ध, क्रुद्ध्वा, क्रोद्धुं.

क्लद् (क्लदु—घटादि —Set) 4 A. वैकल्ये । to make defective.

क्लम् (क्लमु—Set) 4 P ग्लानौ । to be fatigued, क्लाम्यति; अक्लाम्यत्; क्लाम्यतु, Deri क्लान्त, क्लमितुं, क्लमित्वा or क्लांत्वा.

क्लिद् (क्लिदू–Wet) 4 P आर्द्रिभावे । to become wet, क्लेत्तास्मि or क्लेदितास्मि, क्लेत्स्यति or क्लेदिष्यति, अक्लेत्स्यत् or अक्लेदिष्यत्, अक्लिदत्, क्लिद्यास; Desid चिक्लित्सति or चिक्लिदिषति or चिक्लेदिषति, Deri क्लिन्न, क्लेत्तव्य or क्लेदितव्य, क्लेत्तुं or क्लेदितु, क्लित्त्वा or क्लिदित्वा or क्लेदित्वा

क्लिश् (क्लिश–Set) 4 A. (also P according to some) उपतापे । to be afflicted, to torment, Desid चिक्लिशिषते or चिक्लेशिषते, Deri क्लिशित or क्लिष्ट, क्लिशित्वा or क्लिष्ट्वा, क्लेशितु

क्षम् (क्षमू–Wet) 4 P सहने । to endure, to forgive, क्षाम्यति; अक्षाम्यत, क्षाम्यतु क्षाम्येय, क्षमितास्मि or क्षंतास्मि, क्षमिष्यति or क्षस्यति, अक्षमिष्यत् or अक्षंस्यत, अक्षमत्, क्षम्यासं Desid चिक्षमिषति or चिक्षंसति, (other forms are like those of क्षम् 1 A)

क्षिप् (Anit) 4 P प्रेरणे । to throw क्षिप्यति, चिक्षेप, क्षेप्तास्मि, क्षेप्स्यति, अक्षैप्सीत्, क्षिप्यासं, Deri क्षिप्त, क्षिप्त्वा, क्षेप्तुं

क्षिव् (क्षिवु–Set) 4 P निरसने । to spit, क्षीव्यति, अक्षीव्यत, क्षीव्यतु, क्षीव्याम. Desid चुक्ष्युषति, चिक्षेविषति, Deri क्ष्युत, क्ष्यूत्वा, क्षेवित्वा, क्षेवितुं.

क्षी (Anit) 4 A. हिंसायाम् । to kill, क्षीयते, चिक्षिये, क्षेतास्मि,क्षेष्यते, अक्षेष्ट, क्षेषीय, Caus क्षाययति–ते अचिक्षयत्–त. Desid चिक्षीषते

क्षुध् (Anit) 4 P. बुभुक्षायाम् । to be hungry, क्षोद्धास्मि, क्षोत्स्यति, अक्षोत्स्यत, अक्षुधत, क्षुध्यासं, Desid चुक्षुत्सति, Deri क्षुधित, क्षुधित्वा or क्षोधित्वा, क्षोद्धुं

क्षुभ् (Set) 4 P. संचलने । to be agitated, to shake, Desid चुक्षुभिषति or चुक्षोभिषति, Deri. क्षुभित or क्षुब्ध

क्ष्विड् { ञि-क्ष्विडा } क्ष्विद् { ञि-क्ष्विदा } (Set) 4 P. स्नेहनमोचनयोः । to melt, to discharge, क्ष्विद्यति, चिक्ष्वेद, क्ष्वेदितास्मि, क्ष्वेदिष्यति, क्ष्विद्यासं, Desid. चिक्ष्विदिषति-ते or चिक्ष्वेदिषति-ते, Deri क्ष्विण्ण ro क्ष्वेदित, क्ष्वेदितु, क्ष्विदित्वा or क्ष्वेदित्वा

खिद् (खिद्-Anit) 4 A दैन्ये । to be distressed, खेत्ताहे खेत्स्यते, अखेत्स्यत, अखित्त, खित्सीय, Deri खिन्न, खेत्तुं, खित्त्वा.

गुध् (Set) 4 P परिवेष्टने । to cover.

गुप् (Set) 4 P व्याकुलत्वे । to be confused or disturbed, Desid. जुगुपिषति or जुगोपिषति, Deri गुपित, गुपित्वा, or गोपित्वा.

गूर् (गूरी—Set) 4 A. हिंसागत्योः । to kill, to go, Deri गूर्ण. गूरित्वा, गूरितुं.

गृध् (गृधु—Set) 4 P. अभिकांक्षायां । to covet, to long for, Caus. Aor अजीगृधत्—त or अजगर्धत्—त Deri. गृद्ध, गर्धितुं, गर्धित्वा or गृद्ध्वा

घूर् (घूरी—Set) 4 A हिंसा—वयोहान्योः । to kill, to become old, P P घूर्ण

चूर् (चूरी—Set) 4 A दाहे । to burn, P P चूर्ण.

छो (Anit) 4 P छेदने । to cut, to mow, छ्यति, अछ्यत्, छ्यतु, छ्येयं, चच्छौ, चच्छिथ, or चच्छाथ, छातास्मि, छास्यति, अच्छास्यत् अच्छात् or अच्छासीत, छायासं, Pass छायते, अच्छायि, Caus छाययति-ते, अचिच्छयत-त, Desid चिच्छासति Deri. छात or छित, छातुं, छात्वा or छित्वा

जन् (जनी—Set) 4 A प्रादुर्भावे । to be born, to grow, to become जायते, अजायत, जायतां, जायेय, जज्ञे, जज्ञिषे, जनिताहे, जनिष्यते अजनिष्यत, अजनि. अजनिष्ट, जनिषीय, Pass. जन्यते, or जायते अजनि, Caus जनयति, अजीजनत्, Desid. जिजनिषते, Deri. जात, जनितुं, जनित्वा

जस् (जसु-Set) 4 P मोक्षणे । to set free, Deri. जस्त, जासित्वा, or जस्त्वा, जासितुं.

जूर् (जूरी–Set) 4 A हिंसावयोहान्योः । कोपेच । to kill, to grow old, to be angry with. P. P जूर्ण.

जॄ (जॄ—ष्–Set) 4 P वयोहानौ । to grow old, to decay, to perish, to be digested जीर्यति, अजीर्यत्, जीर्यतु, जीर्येयं, जजार, जजरुः or जेरु जजरिथ, or जेरिथ, जरि(री)तास्मि, जरि(री)ष्यति अजरि(री)ष्यत्, अजरत्, or अजारीत्, जीर्यासं, Pass जीर्यते, जरि(री)ष्यते, अजारि, Caus जरयति-ते, अजीजरत्-त, Desid जिजरि(री)षति or जिजीर्षति, Deri जीर्ण, जरि(री)तव्य, जार्य, जर्य, जरि(री)तुं जरि(री)त्वा, अनुजीर्य, जीर्यत्, जिजीर्वस्.

झॄ (झॄ—ष्—Set) 4 P वयोहानौ । to grow old

डिप् (Set) 4 P. क्षेपे । to throw

डी (डी–ङ–Set) 4 A विहायसागतौ । to fly डीयते, अडीयत, डीयतां, डिडेय, Deri डीन, डीयमान (Other forms are like those of डी 1 A).

